श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

परमहंस परिव्राजकाचार्य श्रीमुष्णं आण्डवन् श्रीरङ्गरामानुजयति कृतं

# ॥ पञ्चानन पञ्चामृतम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our thanks to Sri. Balaji Ramanujam and Sri. Sundar Varadarajan for their assitance in the preparation of this document.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ पञ्चानन पञ्चामृतम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विहङ्गमेन्द्रवाहनं विभूतियुग्मदायकम्
भुजङ्गतल्पशायिनं दयामयञ्च मायिनम्।
विशिष्टवेषपोषकं विनम्रपापमापकम्
प्रदोषकालसम्भवं नमाम माधवं हरिम्॥ १ ॥

उमानवादिदैवतैः युगादिसृष्टभूमिकैः
सदार्चिताङ्घ्रिपद्मकं सपद्मकन्धरान्वितम्।
निरस्तसर्वहेयकं समस्तसद्गुणाकरम्
प्रदोषकालसम्भवं नमाम माधवं हरिम्॥ २ ॥

सुवर्णनेत्रसूदनं सुवर्णगर्वबोधकम्
ज्वलत्सटावितानित प्रदीप्तनेत्रभासुरम्।
विचित्रशक्तिमेदुरं विमानमेयरूपकम्
प्रदोषकालसम्भवं नमाम माधवं हरिम्॥ ३ ॥

सुयन्त्रबद्धमन्दिरं सुमन्तृसिन्धुनन्दकम्
सुदर्शनं सुदर्शकं सुषेणहेतिधारिणम्।
सहस्रनेमिमध्यकं सदा हि सेन्दिरं हितम्
प्रदोषकालसम्भवं नमाम माधवं हरिम्॥ ४ ॥

सुलक्ष्मिलक्ष्मवक्षसं सुबालवाक्यपालकम्
सदर्थतन्त्रदेशिकं कुतन्त्रयन्त्रनाशकम्।
किरीटहारभूषितं कृपीठयोनिसेवितम्
प्रदोषकालसम्भवं नमाम माधवं हरिम्॥ ५ ॥

अवग्रहादिशान्त्यर्था वराहकविना कृता।
पञ्चश्लोकी सदा दद्यात् पञ्चाननकृपां पराम्॥ ६ ॥

॥ इति पञ्चानन पञ्चामृतं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥